शान्तिः

जङ्घे चार्थचयो नित्यं गुदे रोगभयं भवेत् ॥
ऊर्व्वोस्तु वाहनाशाप्तिर्ज्जानुजङ्घेऽर्थसंचयः ।
वामदक्षिणयोः पादे भ्रमणं नियतं भवेत् ॥
वत्सराः प्ररोहणे चैव पतने शरटस्य च ।
व्यत्यासाच्च फलञ्चैव तद्वदेव प्रजायते ॥
वत्सराः प्ररोहणं रात्रौ शरटस्य प्रपातनम् ।
निधनार्थाय भवति व्याधिपीड़ा विपर्य्यये ॥
पतनानन्तरं चैवारोहणं यदि जायते ।
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ॥
आरोहणयोर्द्ध्ववक्त्रे अधोवक्त्रे च पातनम् ॥
भवेदिष्टफलं तस्य तत्काले जायते ध्रुवम् ॥*॥
स्पृष्टमात्रे तयोः सद्यः सचेलं जलमाविशेत् ।
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनम् ॥
वल्लीरूपं सुवर्णस्य रक्तवस्त्रैश्च वेष्टयेत् ।
पूजयेद्गन्धपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ॥
पञ्चगव्यं पञ्चरत्नं पञ्चामृतं सपल्लवम् ।
पञ्चवृक्षकषायञ्च निक्षिप्यावाहयेत्ततः ॥
पूजयेद्गन्धपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ।
मृत्युञ्जयेन मन्त्रेण समिद्भिः खदिरैः शुभैः ।
तिलैर्व्याहृतिभिर्होममष्टोत्तरसहस्रकम् ॥"
वल्ली गृहगोधिका । मृत्युञ्जयमन्त्रस्त्र्यम्बकमन्त्रः इति विद्याकरः ॥*॥ गर्गसंहिताबार्हस्पत्ययोः ।
"ये तेषु शान्तिं कुर्वन्ति न ते यान्ति पराभवम् ।
ये तु न प्रतिकुर्वन्ति क्रियया श्रद्धयान्विताः ।
दाम्भिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात् ॥"*॥
अत्र निमित्तनिश्चयवतोऽधिकारोऽन्यथा दोष इत्याह मत्स्यपुराणम् ।
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ॥"
एतच्च तत्तद्विशेषविहितशान्तिविषयम् ।
अन्यथा वेलामण्डलसन्देहे शान्तिर्न स्यात् ॥*॥
अतएवोक्तं योगियाज्ञवल्क्येन ।
"यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमक्षतैः शुचिः ॥
हन्तुकामश्च नृपतेर्घृतेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्वसु नित्यशः ॥
प्रणवव्याहृतिभ्याञ्च स्वाहान्तो होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारिके ॥
मार्कण्डेयपुराणम् ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ।
परस्पराभिरक्षा च ग्रहदोषेषु जायते ॥"
तथा ।
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ॥
भूदोहानुपवासांश्च शस्तं चैत्यादिवन्दनम् ।
कुर्य्यात् होमं तथा दानं श्राद्धं क्रोधविवर्ज्जनम् ॥
अद्रोहं सर्वभूतेषु मैत्रीं कुर्वन्ति पण्डिताः ।
वर्ज्जयेदुषतीं वाचमतिवादांस्तथैव च ॥
ग्रहपूजाञ्च कुर्व्वीत सर्वपीड़ासु मानवः ।
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः ॥"*॥
लोकवादाश्च तत्रैवोक्ता यथा,—
"आकाशाद्देवतानाञ्च देव्यादीनाञ्च सौहृदात् ।
पृथिव्यां प्रतिलोके च लोकवादा इति स्मृताः ॥"
ते च सर्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकिकौषधमन्त्रादयः । विषहरीमङ्गलचण्डिकागीतादयः । चैत्यद्रुमादौ चैत्रपालकुलदेवतापूजा च ॥*॥ तथा चापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्मशेषान् प्रतीयादित्येक इति । धर्मशेषान् श्रुतिस्मृतिसदाचारेष्वप्रसिद्धान् इति नारायणोपाध्यायाः ॥ भूदोहश्च पात्रं विना भूमौ गोस्तनं निष्पीड्य दुग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्यातो ग्रामप्रधानवृक्षः । तथा च बाणोत्पाते हरिवंशः ।
"अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्च्चितः सर्वकन्याभिर्दानवानां महात्मनाम् ॥"
उषतीं अकल्याणीम् । अतिवादश्च पूज्यमतिक्रम्य भाषणम् ॥*॥ मत्स्यपुराणम् ।
"काकस्यैकरवश्रावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेत् वा तथा गृहे ।
ज्ञेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥"*॥
वराहसंहितायाम् ।
"क्रीड़ातुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नासौ गृहस्वस्य विनाशहेतु-
र्दोषः समुत्पाद्यत आहुरार्य्याः ॥
गृहे पक्षिविकारेषु कुर्य्याच्चामरतर्पणम् ।
देवाः कपोता इति वा जप्तव्यं सप्तभिर्द्विजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
मृगैर्द्विजैर्वापि निवेदितं तत् ॥"
द्विजैः पक्षिभिः । अपिना अन्यैरपि ॥*॥
भुजबलभीमे ।
"एको हयस्त्रयो गावः सप्ताश्वा नव दन्तिनः ।
सिंहप्रसूतिकाश्चैव कथिताः स्वामिघातिकाः ॥"
सिंहप्रसूतिका गावः ॥*॥ मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु शस्तं विस्फुरणं भवेत् ।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
लाञ्छनं पिटकञ्चैव ज्ञेयं विस्फुरितं तथा ।
विपर्य्ययेण विहितं सर्वं स्त्रीणां फलं तथा ॥"
"अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च तर्पणं स्यात् ।" शङ्खः । दुःस्वप्नानिष्टदर्शनादौ घृतं हिरण्यञ्च दद्यादिति ॥*॥ मात्स्ये ।
"नमस्ते सर्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृहस्पते ।
क्रूरग्रहैः पीड़ितानाममृताय नमो नमः ॥
संक्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ।
कुर्वन् बृहस्पतेः पूजां सर्वान् कामान् समश्नुते ॥*॥"
वैष्णवामृते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ।
महाशान्तिकरः श्रीमान् तुलस्या पूजितो हरिः
उत्पादान् दारुणान् पुंसां दुर्निमित्ताननेकशः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहेति ॥*॥"
छन्दोगपरिशिष्टम् । अथातो रजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजनने विजातीयजनने वा काककङ्कगृध्रवल्गुश्येनभासचिल्लकपोतानां गृहप्रवेशे मानुषस्योपरिविश्रामणे एवामेव क्रियमाणे गृहद्वारारोहणे अन्येषु चाद्भुतेषु कल्पदृष्टेन विधिनाग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्ज्जुहोति अद्भुताय अग्नये स्वाहा सोमाय विष्णवे रुद्राय वायवे सूर्य्याय मृत्यवे विश्वेभ्यो देवेभ्यः स्वाहेति स्थालीपाकाहुतान्यदिति ॥*॥ कपोतं विशेषयति शौनकः ।
"रक्तपादः कपोताख्यो अरण्यौकाः शुकच्छविः
स चेच्छालां विशेच्छालासमीपञ्च व्रजेद्यदि ।
अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु ॥"
कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्ताज्याहुतीः अद्भुतदोषप्रशमनार्थाः सप्ताज्याहुतीः अद्भुतायाग्नये स्वाहा इत्यादिमन्त्रैः तत्स्थालीपाकेति कर्त्तव्यतया पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात् । छन्दोगपरिशिष्टम् । पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति । गोवरं गोश्रेष्ठम् । दक्षिणां तां गां कृत्वा दोषशान्तिर्भवतीति । तथा चोक्तम् ।
"गौर्विशिष्टतमा लोके वेदेष्वपि निगद्यते ।
न ततोऽन्यद्वरं यस्मात् तस्माद्गौर्वरमुच्यते ॥"
छन्दोगपरिशिष्टम् । यस्त्वेषामन्यतममापन्नः प्रायश्चित्तं न कुर्य्यात्तस्य गृहपतेर्मरणं सर्वस्वनाशो वा भवति तस्मात् प्रायश्चित्तं कर्त्तव्यं कर्मापवर्गे वामदेव्यगानं शान्तिः शान्तिरिति । अपवर्गे समाप्तौ । वामदेव्यगानं शान्तिः कार्य्या । आहत्तिः प्रकरणसमाप्त्यर्था । बार्हस्पत्ये ।
"शमयन्त्यासप्ताहात् कम्पादिकृतं निमित्तमात्रेव ।
पतिवर्णोपवासव्रतदीक्षाजप्यहवनानि ॥*॥"